No. ४३६ / घ

Title लिङ्ग विशेष विधिः (सटीकः)

Author वररुचिः

Extent २४ पत्र Age

Subject व्याकरण

लिङ्गःविशेषविधिः

४२६



लिंगवशेसविधिकोस

४३२

श्रीगणेशायनमः पाशांकुशप्रभृति भूषणभूषितांगां सर्वांगरम्यमतुलीयविचित्रवेषां बन्ध्वादिसेवित पदांकमनीयरूपां दुर्गांभजामिसततं त्रिपुरांसिवाम् १ शब्दाबहुविधालोके संतियद्यपिविस्तरात् तथापिकेचिदुच्यंतेघ्राणाभाववल्कहेतवे २ जातिशब्दाः क्रियाशब्दा गुणशब्दास्तथापरे संज्ञाभेदाभवंत्यत्रसंक्षेपादुच्यते त्रिधा ३ गौरश्वः पुरुषोहस्ती शकुनिर्मृगस्तथा त्विति इत्यन्तेरायतेरात्तेभवतीत्येवमादयः ४ रक्तः श्वेतोवृद्धः कृष्णः एवंडित्थकपित्थवत् पुंसि केचित्स्त्रियामन्ये क्लीवे केचिदुदीरिताः ५ स्तनकेशवती स्त्रीस्यात् लोमशः पुरुषः स्मृतः उभयोरन्तरंयच्च तदभावेनपुंसकं ६ व्याडिजैमिनिकोषसूत्ररचनाकात्यायनीयंतथा व्यासीयंकविशंकरप्रभृतिभिर्यद्भाषितं निश्चयात् यच्चानंदकविप्रवीररचितंवद्वंचयद्दंडिना यद्वात्स्यायनशाम्बनादिकथितं कुर्वेऽभिधानाद्भुतं ७ माकुर्वन्तुभयंकरालकलिताः श्वा

व० को० १

यः स्मृतेर्लालसनात्सर्वभ्रांतज्जनादनेककविताहीनप्रगल्भाश्रयात् उद्धारं भवतां विधाय हृदये भो
भ्रातरो यं मया कर्त्तव्यः परमोद्यमः श्रमविधेः शास्त्रात्कृतः सीदथ ८ किं पद्यमात्ररचनाभिरनेकवा
रं किं वल्गनैः किमिह दर्पपरीतवाक्यैः यत्नाभ्यसत्ते किल समाधिविधेर्विधानात्कित्त्रविस्तरविवेचन
वाग्भरार्थ्यः ९ को वेद शास्त्रजलधेरखिलस्य पारं सारं विधाय विधिना मनसा विचारात् शंबूकमर्क
टकषाद्दिभिरेवसंगः प्रायो भवेदिह नरत्नमिलिः कदापि १० यावान्कश्चित्रांतः शब्दो नपुंसकोऽ
बोद्धव्यः वर्जहि पुत्रमंत्रमित्रचानेर्वगारित्रं च ११ यावानिति समुच्चये कश्चिद्यस्त्रांतः शब्दः नपुंस
केऽवबोद्धव्यः पुत्रमंत्रमित्रशब्दान्वर्जयित्वेत्यर्थः यथा सूत्रं शास्त्रं शस्त्रं मित्रं पत्रं पवित्रं च गा
त्रं पात्रं दात्रं सत्रं चरित्रं चेत्यादि अयं पुत्रः सुतः अयं मंत्रो होमवाच्यो वेदस्य हि शब्दानुक्तसमुच्चया
र्थः तेन छत्रच्छात्रविद्युन्मित्रादीनां पुंस्त्वप्राप्तिः सिद्धिः अयं छात्रो नर्त्तकः आतपवारणवाचक

स्यच्छत्रशब्दस्य नपुंसकत्वेन इदं छत्रं वर्षातपवारणं अयं छात्रोऽध्येता अयं विश्वामित्रः कश्चित्सुरु

व॰ को॰ षः यात्रामात्राभस्त्रादंष्ट्राविद्यास्त्रियां वरत्रा च इदं दंतं पत्रैकाचु शतादहदयस्यारूपस्यैव ११ यात्रा

१ मात्रादिकान् शब्दान् स्त्रियां स्त्रीलिंगे विद्याज्जानीयादित्यर्थः इयं मात्रा तीर्थादिगमनं इयं मात्राऽ

क्षरावयवस्तोकं च इयं भस्त्रा लोहधमनी इयं दंष्ट्रा दशनविशेषः इयं वरत्रा त्रिगुणीकृता रज्जुः

2 वरत्रादीनामपि त्रांतत्वान्नपुंसकत्वे प्राप्ते ब्रूमः अप्रत्ययाभावात् तद्भावस्याभावादिति भावांतं च

भाववाचका यांतो त्र प्रत्ययः स्यात् ईदृशेत्युक्तेः नार्थं ते यस्य तदिदं शब्दरूपमित्युक्तं अतः शब्दः

प्रत्येकमभिसंबध्यते इदं तेऽप्यमाणपदं प्रत्येकमभिसंबध्यत इत्युक्तत्वात् एकोऽच् यस्य तत्

एकाच् एकस्वरमित्यर्थः इदं दंतं यत्रैकाचा वल्लि यां तत्स्वरूपं भवति इयं स्त्री योषित् इयं श्री

देवताविशेषः प्रभुशक्तिश्च इयं भ्रूर्नेत्रोपरिरेखा एकाजिति किं सेनानीः ग्रामणीः शरदाद

ऽपि स्त्रियां इयं शरत् ऋतुविशेषः इयं दरत् ग्रीवास्थानं इयं दृषत् शिला इयं प्रावृट् जलधरस
मयः चकारः समुच्चयार्थः एवकारोऽवधारणे स्थूणोर्णे स्त्रियां गेहस्तोर्गृहशशपूर्वकयोर्नपुंसक
ता सर्वस्याक्षिनाम्नो जलनाम्नश्चैव मुक्त्वापः ७३ स्थूणोर्णे इति स्थूणा चोर्णा च स्थूणोर्णे स्त्री
लिंगे स्तः स्त्रीलिंगे भवतः इत्यर्थः इयं स्थूणा काष्ठमयी द्विकरिका इयमूर्णा मेषलोमा तयोरेव
स्थूणोर्णयोर्यथासंख्यं गृहशशपूर्वकयोर्नपुंसकत्वं इदं गृहस्थूणं इदं शशोर्णं गृहशशपूर्वक
योरिति किं इह माभूत् इयं स्थूणा शाला इयं मेषोर्णा सर्वशब्दो निर्विशेषवाची सर्वमक्षिकाना
म जलनाम च नपुंसके भवति अक्षिनाम तावत् इदमक्षि लोचनं नेत्रं नयनं चक्षुर्दृगं वक्त्रमीक्ष
णादि जलपर्यायः इदं जलं तोयं सलिलमंबुनीरं वावीरकानन मुदकं वनमित्येवमादि जलशब्दत्वा
देषशब्दस्यापि नपुंसकत्वं प्राप्नोतीत्याह मुक्त्वापः अपशब्दं वर्जयित्वेत्यर्थः अस्याहि स्त्र्यधिकारा

स्त्रीत्वं इमा आपः बहुवचनान्तः सदैव जलकुसुमनाम सर्वं नपुंसकं स्यात् पद्मादस्तु विभाषया अभ्राद्
बं० को० न्तं बुद्बुदाख्याहि केशनखदन्तसंज्ञाश्च जलकुसुमनाम सर्वं निर्विशेषं नपुंसकलिंगं भवति तद्यथा इदं कम
२
लं पंकजं कोकनदं कह्लारं कुशेशयमित्यादि जलकुसुमत्वेन नपुंसकत्वे प्राप्ते पद्मस्य विभाषा क्रियते इदं
3
पद्मं अयं पद्म इति उक्तं च वसन्ते शीतभीतेन कोकिलेन वने रुतं अन्तर्जलगताः पद्माः श्रोतुकामा इवास्थि
ताः ऋते शब्दो वर्जनार्थे वर्त्तते अभ्रशब्दमेकं वर्जयित्वा अभ्रं बुद्बुदा मेघास्तेषामाख्या संज्ञा पर्याया इत्यर्थः
ते बुद्बुदाख्याः शब्दाः पुंसि भवन्ति तद्यथा इमे बुद्बुदाः मेघाः पयोधरा घनाः जीमूता जलधरा वलाहकाः कंधरा इ
त्येवमादयः इमे केशाः इमे नखाः इमे दन्ताः कण्ठस्तनबाहूनां संज्ञाः पुंसि स्त्रियां भवेद्ग्रीवा पृष्ठललाटांशो
दरजत्रूणि नपुंसकानि स्युः १५ कण्ठसंज्ञा स्तनसंज्ञा बाहुसंज्ञाश्च पुंसि भवन्ति अयं कण्ठः गल इत्या
दि स्तनसंज्ञाश्च अयं स्तनः कुचः पयोधर इत्यादि बाहुसंज्ञाश्च भुजस्तरणः धरणः चालन इत्यादिः कं
३

ठसंज्ञकत्वात् ग्रीवाशब्दस्यापि पुंसि प्रयोगः प्राप्नोतीत्याह स्त्रियां भवेद्ग्रीवा ग्रीवा शब्दस्य स्त्रीलिंग
ता भवति इयं ग्रीवा शिरोधरा कंधरा इत्येवमादयः पृष्ठादयः शब्दाः नपुंसके स्युः तद्यथा इदं पृष्ठं पार्श्व
योर्यायः इदं ललाटं भ्रुवोरुपरिस्थानं इदमंसं स्तनयोरुपरिस्थानं इदमुदरं जठरः इदं जत्रु स्कंधसंध
धि इत्येवमादयः ऊर्मिध्वन्यंजलयः पुंस्योष्ठकपोलगुल्मसंज्ञाश्च घञ्जैरश्रुकदोरपवस्याद्दहुलमंध
कारस्य ॥१६॥ ऊर्मिश्च ध्वनिश्च अंजलिश्च ऊर्मि ध्वन्यंजलयः एते शब्दाः पुंसि भवंति अयमूर्मिस्त
रंगः अयं ध्वनिः शब्दः अयमंजलिः करपुटः ओष्ठकपोलगुल्मसंज्ञाश्च संज्ञा शब्दः प्रत्येकम
भिसंबध्यते ओष्ठकपोलश्च गुल्मश्च ओष्ठकपोलगुल्माः एतेषां संज्ञाः पर्यायास्ते पुंसि भवंति अय
मोष्ठः अधरः दंतछदः अयं कपोलः गल्ल इत्येवमादयः अयं गुल्फः पादग्रंथिः घुंटः घूंट इत्येवमा

दयः घृत्वरश्च ऋदोरप् पदरुजविशस्पृशो घञित्येवमादिना प्रकरणेन घञो विहितइति येनविधिस्त
दंतस्येति घञ्प्रत्ययांताः शब्दाः पुंसि भवंति तद्यथा पादः रोगः वेगः स्पर्शः पाकः त्यागः योगः प्र
मादः भेदः छेदः दाहः दोषः प्रकारः विकारइत्येवमादयः एरजिति एरच् इवर्णांतादच् प्रत्ययः
स्यात् अयं जयः नयः तथा ऋदोरप् ऋवर्णांतादुवर्णांताच्च धातोरप् प्रत्ययः स्यात् तत्र ऋ
वर्णांतात् अयं करः वरः भरः शारः नरः इत्येवमादयः उवर्णांतात् अयं लवः पवः भवत्येवमा
दयः घञंतादंधकारशब्दस्यापि नित्यं पुंस्त्वं स्यादित्याह बहुलमंधकारस्य अंधकारो बहुलं पु
ल्लिंगे भवति विभाषा भवतीत्यर्थः इदं अंधकारं अयं अंधकारः तथा चोक्तं ॥ नेहागमोस्ति सल
भस्य न मारुतस्य स्नेहक्षयोपि न भवेत्प्रथमे प्रदोषे अव्यक्तवस्तु पुरुषप्रतिबोधितेन पारावतेन पतता

कृतमेधकारं प्राण्यंगमिदंत्तेवस्तिकुक्षिपाणीन्विमुच्यसर्वस्त्री जंघाशिरास्नुषानासिकाचूडावसाचे
व १३ प्राणो नामवायुःसोस्यास्तीतिप्राणीतस्यांगंप्राण्यंगं इकारः अंतेयस्य तदिदंतं तत्सर्वस्त्रीलिंगंभवति
तद्यथा इयंकटिः श्रोणिः अंगुलिः पंक्तिरित्यादि वस्तिकुक्षिपाणीनामपीदंतत्वात्स्त्रीत्वेप्राप्ते बाधः क्रिय
ते एतान्विमुच्यवर्जयित्वेत्यर्थः पुंसीत्याधिकारात्तेषां पुंस्त्वमेवभवति अयंवस्तिःनाभेरधः अयंकुक्षिःउ
दरस्थानं अयंपाणिर्हस्तइति जंघादयःशब्दाःस्त्रियांभवति इयंजंघाजानुनोरधस्तात् पादस्योपरिस्था
च इयंशिरादेहधारिणी इयंस्नुषापुत्रवधूः इयंनासिकागंधहारिणी इयंचूडाशिखा इयंवसाशोणि
तविकारः स्नेहश्च स्रक्स्नुक्स्फिक्त्वक्वाग्योषित्ताहिविद्यात्स्त्रियांधुनावीच दीधितिमेकामुक्त्वा
रश्म्यभिधानंतुपुंस्येव १६ स्रगादयःशब्दाःस्त्रियांभवंति तद्यथा इयंस्रक्माला इयंस्नुक्यज्ञोपक

क॰ को॰
५,५
5

रणमांडं इयंस्फिक्कटिप्रदेशः इयंत्वक्वहिश्चर्म इयंवाकाःरवाणी इयंयोषित्वाला द्यौश्चनौश्चद्यु
नावौचस्त्रियांभवतः इयंद्यौःस्वर्गः इयंनौःजलतरणिः हिशब्दःपादपूरणे दीधितिमेकांवर्जयित्वा रश्मि
वाचकाः शब्दाःपर्यायाश्चयेतेपुंसिभवंति तद्यथा रश्मेरश्मयः प्रग्रहाःकिरणाः अंशवः पादाः मयूखाःअ
भीशवः गभस्तयः घृणयइत्येवमादयः दीधितिशब्दःस्त्र्यधिकारात्स्त्रियांभवति इयंदीधितिः नुशब्दःपा
दपूरणे घृमूर्द्धमस्तनतक्षमज्जस्नेक्ष्मात्मयुवपूषराजभोराहितं सर्वदंकंनांतंनपुंसकंपुंसिवाभवेद्ब्रह्मा १९
मूर्द्धन्इदस्तनतक्षनमज्जनस्नेक्ष्मन्ग्रात्मन्ग्र्यश्मन्नयुवन्पूषन्इत्येतैःशब्दैःरहितंवर्जितंयदन्यत् द्वंकं
दिसंवनांतंप्रातिपदिकंतत्सर्वंनपुंसकंभवति यथा इदंचर्म वर्मशर्मभस्मसद्मलोमइत्येवमादयः मू
र्द्धादयोपिनांतत्वात् द्यंक्ताःअतस्तेषामपिनः पुंसकत्वप्राप्नोति तदर्थमितिप्रतिषेधःकृतः मूर्द्धास्तत

सेत्यादि पुंल्लिंगाः अकारान्ताः पुंसि भवंति यथा अयं मूर्द्धा शिरः उक्षा वृषभः मज्जा सारः तक्षा वर्द्धकिः श्ले
ष्मा धातुविकारः आत्मा शरीरस्थः अश्मा नीलः युवा तरुणः पूषा आदित्यः पुंसि वा भवेद्ब्रह्मेति ह्यंकला
न्तत्वाच्च ब्रह्मशब्दस्य नपुंसकत्वे प्राप्ते पुंस्त्वं वा विधीयते ब्रह्मशब्दो वा नपुंसकलिंगो भवति इदं ब्रह्म
वेदाध्ययनमभ्यासस्व अयं ब्रह्मा प्रजापतिः यद्येवं यत् ह्यंकन्तात्तन्नपुंसकं एवं सति राजन्शब्दस्या
पि नपुंसकता स्यात् पुंस्त्वं न भावो द्रष्टव्यः १९ त्रुटिसीमसंध्याराज्ञयः स्त्रियां धूलिर्वेणिः खार्यश्च पुं
सि न तु सीयो ज्योत्स्नादयाः शलाकाः स्त्रियां नित्यं २० एते शब्दाः स्त्रियां भवंति इयं त्रुटिः स्वल्पः इ
यं सीमा ग्राममर्यादा इयं संध्या दिनावसाने इयं रात्रिः शर्वरी इयं धूलिः पांसुः इयं वेणी केशरचना
इयं खारी परिमाणविशेषः निशीथशब्दः पुंसि भवति अयं निशीथो अर्द्धरात्रः ज्योत्स्नादयः श

ब० को०
६६

लाकाः स्त्रियां भवंति इयं ज्योत्स्ना चंद्रप्रभा इयं दया करुणा इयं शलाका लोहधमनी नित्यग्रहणं विभा
षानिवृत्त्यर्थं पुंयोगे कर्णहनू नपुंसके श्मश्रुजानुगुदशाखाः एकाभिधानतास्यात्तथस्त्राश्रुणोर्नित्यं २१ पुं
सो योगः पुंयोगः तस्मिन्कर्णहनू भवतः यथा अयं कर्णः श्रोत्रं कुंतीपुत्रश्च हनुः कपोलप्रदेशः श्मश्रुजा
नुगुदशाखाः नपुंसके भवंति इदं श्मश्रु मुखैकदेशरोमराजिः इदं जानु जंघामध्यस्थानं इदं गुदमपानं अ
भिधीयते अनेनेत्यभिधानं एकं च तदभिधानं च एकाभिधानं तस्य भावः एकाभिधानता स्यात्तु भवेदित्य
र्थः अस्त्राश्रुणोर्नित्यं नपुंसकता भवति इदमस्त्रं इदमश्रु नयनजलमित्यर्थः एक एवार्थो नित्यव
चनं पूर्ववत् घुमहकिरुपसर्गपूर्वः पुंस्यन्योपपदेवेषु पूर्वः स्त्री ये भ्यो न मत्तान्पुंस्युक्ता न्याश्च्वो विनावि
द्धि २२ घु इति दाधाघ्वदाविषयाणां धातूनां घुसंज्ञा विहिता सा इह कितावर्त्तत इति सकिः उपसर्गो घोः

क्तिरित्यादिना विहितः क्तिवत्प्रयोगः गृह्यते उपसर्गाः प्रादयः उपसर्गाः क्रियायोगे इति उपसर्गः पूर्वो य
स्य स एव पुल्लिंगो भवति यथा प्रयमादिनिधिः परिधिः आधिः सन्निधिः इत्येवमादयः इषुशब्दो
पपदेनास्त्री इयमिषुधिः अयमिषुधिः तूणीरं एभ्यो धातुभ्यो नङ्प्रत्ययः तान्पुंस्युक्तान्विद्धि जानी
हि याच्ञाशब्दं वर्जयित्वा यजयाचयतविछप्रच्छरक्षो नङ्प्रत्ययः अयं यज्ञः यत्नः विश्नः प्रश्नः र
क्ष्णः एवं तर्हि याच्ञाशब्दस्यापि नङन्तत्वात्पुंसकत्वं स्यात् इत्यत आह याच्ञां विनेति स्त्र्यधिकारात्
स्त्री याच्ञा प्रार्थना २१ तनुकायशरीराणि स्त्रीपुंनपुंसकेषु जानीहि दधिसक्थ्यस्थीनि स्युर्नपुंसके स्त्री
तु कक्षा स्यात् २२ एतान् शब्दान्यथासंख्यं स्त्रीपुंनपुंसकेषु विद्धि इयं तनुः अयं कायः इदं शरीरं द
धि शक्थ्यस्थि शब्दा नपुंसके स्युः यथा इदं दधि क्षीरविकारः इदं सक्थि उर्वीमध्यं इदमस्थि कीकसं क

व०को०
९

सारादः स्त्रियां भवेत् यथास्यं कक्षा बाहुमूलं अन्यच्च जघनाभरणे स्त्रीणां करीणां मध्यबंधने अ
वस्थानुचहर्म्याणां नित्यं कक्षा व्यवस्थिता २३ सुमनोप्सरोविरहितमद्व्यकमसंतं तु पुंसि स्यात् दं
कं पुनर्नपुंसकप्रकृतादन्यत्र वैजरसः २४ सुमनस् अप्सरस इत्येताभ्यां विरहितमुक्तामित्यर्थः असन्नंतेय
स्यात्तदिदमसंतं पुंसि भवेदित्यर्थः अयमंगिराः चंद्रमाः स्थूलशिराः पुरूरवाः उच्चैःश्रवाः दुर्वासाः पृ
थुयशास्त्यादयः सुमनसोप्सरसश्च स्त्र्यधिकारात्स्त्रियां प्रवृत्तिः इमाः सुमनसः कुसुमानि इमाश्च
प्सरसो देवस्त्रियः द्व्यकमसंतं नपुंसकं भवति इदमोजः तेजः वर्चः शिरः यशः छंदः स्रोतः चेतः पयः
तपः अंभः जरसः शब्दस्यापि नपुंसकत्वा स्यादित्यत आह अन्यत्रैवेजरसः नपुंसकात्प्रकृताच्च पुल्लिंगादन्य
स्मिन्जरसशब्दो भवति स्त्रियां इयं जरा वृद्धभावः २५ पुंसि क्षुरखुरविंदि सुषायुमणिकीलके

९

लिकलयः निर्घसंघोद्दीपश्चौघ्नविघ्नघर्मार्घवर्णाश्च एते शब्दाः पुंसि भवंति तद्यथा अयं स्फुरः
णापितोपकरणः अयं वुरः पशुपादः अयं विंदुर्विसर्जनीयावयवः अत्यश्चश्रयामस्तुः सस्यजाती अ
यं पायुः अपानं अयं मणिः रत्नं कीलः शंकुः प्रहरणविशेषः अयं केलिः हासः अयं कलिः कलहः।
अयं वलिर्दैत्यः राजग्राह्यदेवतापहारोच निघादयः शब्दाः पुंसि भवंति अयं निघः पर्वतः अयं संघः
समूहः अयमघः प्रशस्तः अयमुपघ्न आश्रयः पर्वतश्च अयमोघो नदीवेगः पुरुषारंभश्च विघ्नः क्ष
मीनिघातः घर्मो निदाघः अर्घः पूजामूल्यविशेषः वर्णो हरितपीतादिः ब्राह्मणादिः अकारादीनि
चाक्षराणि २५ पणगुणाकारणशोरणाः किणफणघुणशाणवाणापूरणाश्च नित्यं हि पुंसि पंथ्यावा
ष्मा क्ष्माध्मानश्च विज्ञेयाः २६ पणादयः शब्दाः पुंसि भवंति अयं पणो विंशतिगंडूकः अयं गुणः

व॰को॰ संख्याख्यः मुञ्जादिः पाटलादिश्च अयं गणः संघातः अयं कणः परमाणुः शोणो नदः किणो नि

८ का२ बद्धः फणो भुजंगफणः घुणः कीटविशेषः शाणः पाषाणविकारः बाणः शरः अमुरः घृष्टिका

च अयं चूर्णः शकलः खंड इत्यर्थः अयं पंथा मार्गः अयं वाष्पोऽश्रु अयमूष्मा घर्मः अयमध्वा मार्गः

४ नित्यग्रहणं विभाषानिवृत्त्यर्थं २६ नपुंसकेऽस्व मत्वताररणाराणीनि वीणातूणाघोणाघृणास्तु

नियतं स्त्रियां विद्यात् २७ एते नपुंसकलिंगे भवंति इदंस्वध्वंतगतिः इदं त्वणं गृहछादनद्रव्यविशे

षः रणं युद्धं ऋणमुद्धारः अधमर्णश्च एतानृ शब्दान् स्त्रियां नियतं निश्चितं विद्यात् इयं वीणा वाद्य

विशेषः तूणा इषुधिः इयं घोणा नासिका इयं घृणा दया बुद्धिः तु शब्दः पादपूरणे २७ यदन्तं त

मकर्तीरत न नपुंसके विद्यान्स्त्रियामेव योभावेऽण्यौ तौ पुंस्युक्तौ मन्युमन्त्वपूच २८ अनष्ट्रांतयस्यात

८

दिदमनोंतं अकर्तरि अन्यत्र त्ययांतं यत्प्रातिपदिकं तन्नपुंसके विद्धि जानीहि नपुंसकाज्ञापेतः इत्य
त्रवर्तमाने ल्युट् चेति ल्युट् युवोरनाकावित्यनादेशः वचनं भजनं पानं आसनं प्रयाणं शासनं अ
धिकरणमित्यादि अकर्तरीति किं नंद्यादिभ्यो ल्युट् नंदनः मरणः मदनः कुलनः शातनः दमनः
संकर्षणः मधुसूदनः जनार्दन इत्यादि अनिः स्त्रियामेव एवकारोवधारणार्थः आक्रोशेनञ्यनिः
यथाशयमं भोजनिः अकरणिः अहरणिः अखादनिः अशसः इयंसटाकेशः इयंवसामेदः इयं
शिफाकंदः अयंस्वर्गः नाकः अयंत्रिदिवः स्वर्गादिनामत्वात्पुंस्त्वे त्रिविष्टपस्यप्राप्तेनीत्यतआह
त्रिविष्टपं स्यादुभयहीनं नस्त्रीनपुमानित्यर्थः इदंत्रिविष्टपंस्वर्गः २९ संवत्सरागारमासाराणिवर्तुदेवा
सुराभिधानानी नित्यं पुंयोगः स्यात् अच्छरापिपंकारिणाम्नांच ३० अभिधानशब्दः प्रत्येकमभिसंबे

व॰ को॰
८

९

धाते संवत्सराभिधायिनां शब्दानां संवत्सरपर्यायाणां च गिर्यादिपर्यायाणां च पुंयोगः स्यादित्य
र्थः तद्यथा अयं संवत्सरः हायनोऽब्द इत्यादि अयं गिरिः पर्वतधरशैल इत्यादि मासाभिधायिनां
अयं मासः द्विवसः मासविशेषोऽपि पुंसि अयं चैत्रः वैशाखः ज्येष्ठः आषाढ इत्यादि अर्णववाचि
नां अयमर्णवः समुद्रः सागरः पारावारः सरित्पतिरित्यादि अयमृतुर्वसंतः ग्रीष्मः देववाचिनां दे
वः सुरः असुरवाचिनां असुरः दैत्यः शराभिधायिनां शरः कांडः अयमसिः खड्गः मंडलाग्रः अयं
पंकः कर्दमः जंबालः अररारित्येवमादिः अणच् अपच अणा यौ यो तौ पुंस्युक्तौ शौ अणाच्वेत्यरा
प्रत्ययः त्यागः उपदेशः उपसर्ग इत्यण्प्रत्ययः निघ्नः पर्वसः किंचान्यो मन्युमृत्यू पुंसि भवतः अ
यं मन्युर्दयाशोकश्च मृत्युर्नाशः १७ पटपुटकघटचंडवाटजूटवटा हि पुंस्युक्ताः अवटखटपट्टकि

रटकीटास्त्रकूटतटयोश्च नपुंसकता २८ एते पटादयः शब्दाः पुंसि भवंति यथा पटः प्रावरणः
पुटः पत्रस्य कटस्फुलणस्य करो गजकुंभश्च घटः कलशः चेटः फलनिवंधनं वाटः मार्गः जूटः केशवंध
नं कूटो वृक्षविशेषः अवटः कूपः खटः शिरसि प्रहारः पट्टः राज्ञ प्रसादः किराटो वणिक् कीटः क्रिमिः
कूटतटशब्दौ नपुंसके भवतः इदं कूटं इत्यस्थानं इदं तटं नदीकूलं २९ घंटाजटासटानां प्रथमाप्रकृ
तिर्वंसाशिफानां च स्वनीम्नां पुंयोगस्त्रीविरूपं स्यादुभयहीनं २९ एते घंटादयः शब्दाः स्त्रियां
भवंति यथाप्रकृतिस्त्रीलिंगमित्यर्थः इयं घंटा वाद्यविशेषः इयं जटा केशविन्यायमरिः शत्रुः
वैरी रिपुः विपक्ष इत्यादि ३० भाष्ठछुकणारज्जुपकाश्च नित्यं स्त्रियां मैषिका च विद्युद्दिग्भूम्य
भिधानं वक्ष्यामि रितां च विज्ञेयं ३१ एते शब्दाः नित्यं स्त्रियां भवंति इयं भाः दीप्तिः कच्छुः पामा के

४०
१०
10

ह्रादनी रज्जुः कुशमयी इष्टिका पक्वमृत्तिका ईषीकी वीरणलाका कर्षिका च विद्युदादिनामभि
धानं स्त्रियां भवति यथा इयं विद्युत् तडित् चंचला शतह्रदा क्षणप्रभा सौदामिनी ऐरावतीत्यादि दिगभि
धानं आशा काष्ठा ककुप् विदिगित्यादयः भूम्यभिधानं इयं भूमिः धात्री रसा पृथ्वी क्षमा क्ष्मा इत्यादि व
ह्न्यभिधानं इयं वह्निः ज्वातिः प्रतानिनी इत्यादयः सरिदभिधानं इयं सरित् नदी कुल्या स्रवंती निम्न-
गा तटिनी इत्यादयः २१ छायासुरानिशावालुकाः स्त्रियां स्युः मूकं येषां स्युः आपत्संपद्विपत्प्रतिपत्त्वत्ति
द्विपुषस्त्रैव २२ छायादयः शब्दाः स्त्रियां स्युः भवेदित्यर्थः यथा छाया वृक्षादेः प्रतिबिंबः सुरा मदि
रा निशा रात्रिः वालुका सिकता चमूः सेना कंथा प्रसिद्धा इरा जलभूमिः एते शब्दाः स्त्रीलिं
गे भवंति यथा इयमापत् व्यसनं संपद्धनं विपद्दुःखं प्रतिपत्तिर्यिविशेषः समित्काष्ठं विद्युद्विं

दुः ३२ कुशाकूवरकुंजांकुरकुठारकुंदकुनुपाहिपुंस्युक्ताः कुलकूलकुंकुमानितुनपुंसकान्येवजानीया
त् ३३ एतेशब्दाःपुंल्लिंगेउक्ताः यथायंकुशः दर्भः अयंकूवरोरथस्कंधः कुंजोगहनः अंकुरोवीजत्रादु
र्भावः कुठारः परशुः कुंदःपुष्पजातिः कुनुपश्चर्मपात्रं एतानिनपुंसकानिजानीयात् एवकारोऽवधा
रणे इदंकुलं ब्राह्मणानां कूलंनदीतटं कुंकुमंकाश्मीरं ३३ लोहमुखपर्णावनधानसंज्ञाश्वनपुंस
केमताः शीरार्थेपुंस्युक्तावटवीतुस्त्रियामेव ३४ संज्ञाशब्दःप्रत्येकमभिसंवध्यते लोहादिसंज्ञा
नपुंसकेभवंति इदंलोहमायसं मुखंलपनंतुंडमाननमित्यादि इदंपर्णपलाशमित्यादि वनंविपिनंका
ननमित्यादि इदंधनंद्रविणंवस्वित्येवमादि शीरार्थेशब्देपुंसिभवतः अयंशिरोलंकारः अयंहिरवं
अटवीतुस्त्रियामेव इयमटवीवनं ३५ राशिपलांडुकमंडलुगडुतूलमुहूर्तपरश्युशंकूनां इतिसाधु

कंकटानां पुंसि च गदितः प्रयोगो हि ३५ एषां प्रयोगः पुंसि गदितः कथितः राशिर्धान्यानां पलांडुर्लसुन

व० को० जातिः कमंडलुः काष्ठमयजलपात्रं गडुः कुब्जं तूलः कार्पासादेः मुहूर्तो द्वादशात्मकः परशुर्वृक्षभेदी शं

११ कुः चिह्नं कीलस्य दृतिश्चर्म अयं सीधुः सुरा अयं कंटको हस्तिकवचं ३५ शाला माला दोला वेला फेला

शिला तुला लीला सेना पालि बलि दद्रु वागुराश्च स्त्रियामुदिताः ३६ एते स्त्रीलिंगे उदिताः कथिताः ३ यं

॥ शाला गृहविशेषः माला स्रक् दोला क्रीडासाधनं वेला कूलं समुद्रस्य फेला भक्तोच्छिष्टं धान्याश्चाशि

ला अश्मा तुला पलशतानुमानं लीला श्रृंगाररसकोविदस्य सेना हस्त्यश्वपदातिसमुदायः पालिः

पंक्तिः प्रदेशः बलिः करः उपहारः दद्रुः कुष्ठविशेषः वागुरा मृगबंधनी रज्जुः ३६ पातालजालमलखं

लकपालशैवालशीलनालानि चीरचीवरविर्यति च विद्धि तृतीया प्रकृतिकानि ३७ एतेषां तृतीयाप्र

११

कृतिः तृतीयास्थानेनपुंसकस्यदृष्टत्वात् पातालादीनितृतीयाप्रकृतीनि विद्धिजानीहि यथाइदंपा
तालंरसातलं जालंमत्स्यबंधनंगवाक्षश्च मलंपापं खलंमर्द्दलस्थानंव्रीहिहिरण्णं कपालंमस्तकास्थिखं
डंच शैवालंजलसंभवं शीलंविनयः नालंपद्मादीनां चीरंचीर्णवस्त्रं चीवरंभिक्षाप्रावरणं विय
दाकाशं २७ मुंडनितंबपक्षानितंबगुल्मसान्वंकवंशापूगशंखरथाश्चपुंसिस्युः जघनांबरफलमूलां
गानितुविमुच्य २८ एतेशब्दाःपुंसिस्युः मुंडंमुंडोमुंडितशिराः नितंबःपश्चाद्भागःस्त्रीकट्याः ह्रस्व
पत्र३ शाखामूलकोवृक्षःस्तंपः गुल्मःशाखाप्रावरणः सानुःपर्वतैकदेशः अंकश्चिह्नं वंशोन्वयः पूगः क्र
मुकः शंखः कंबुः रथःस्यंदनः नपुंसकाधिकारात्जघनादयोनपुंसकेस्युः इदंजघनं कटिप्रदेशः
अंबरमाकाशंवस्त्रंच फलंवृक्षादीनां मूलंशिफा अंगमवयवः २९ क्षीरोदश्विन्नवनीतवर्षकुंडा

उघृतभगगगनानि विद्यान्नपुंसकान्योदनस्तु पुंसि स्त्रियांन्याच ३९ एतानि नपुंसकानि स्युः यथाइदं
१० क्षीरं दुग्धं इदमुदस्विन्नक्षविशेषः नवनीतं दोधविकारः वर्षसंवत्सरः कुंडं पेयादिपात्रं भगं बीजादिप्रादुर्भा
१२ वः घृतमाज्यं भगं योनिः गगनमाकाशं ओदनस्तु पुंसि भवति अयमोदनः भक्तं स्त्रियांन्याच धनुषोगुणः
३९ विषसंज्ञाः पुंसि विषंतु नपुंसकं स्यात् स्त्रियां तिथिर्वोक्ता अतिथिस्तु पुंसि शकृन्नीत शोणितानीत
रथकृतो ४० विषसंज्ञाः पुंसि भवंति हालाहलः कालकूटः वत्सनाभः विषं नपुंसकं इदं विषं सपेश
गेरजंच तिथिशब्दो वा विभाषया स्त्रीलिंगे भवति पुल्लिंगस्तु यथा इयं अतिथिः अतिथिशब्दः पुंसि
भवति अयमतिथिरभ्यागतः सकृदित्यादीनि तरक्षकृतो नपुंसके भवति इदं शकृत्पुरीषं नीतं घृतं
शोणितं लोधरं ४१ मुक्ताहनाहनी दिवसानामानि पुंसि स्त्रियां त्विड्डुतारः पाणियुगः पुंस्युक्तः
१२

स्त्रियांसमाश्चैववर्षास्त्र ४१ दिनाहनी मुक्त्वाऽन्येदिवसपर्यायाः पुंसिभवंति अयंदिवसोवासरः घ
स्त्रः सूर्याकक इत्यादि दिनाहनौनपुंसकेभवतः इदंदिनमहः स्त्रियांलिङ्गआराः त्विडादयः शब्दाः स्त्रि
यांभवंति इयंत्विट्कांतिः इयमुडुर्नक्षत्रं इमास्ताराः नेत्रवाणिपाणियुगः पुंसिभवति अयंपाणियुगः पा
णियुगग्रहणमन्ययुगनिवृत्त्यर्थं ४१ भवतिनपुंसकयोगः संख्यापूर्वस्यरात्रिशब्दस्य समसमासस्यत्तु
तस्यैवपुंसियोगंविजानीयात् ४२ संख्यापूर्वीयदिरात्रिशब्दस्तदानपुंसकेबोध्यः यथाइदमेकरा
त्रं द्विरात्रं त्रिरात्रमित्येवमादयः सहसमासेनवर्तत इतिससमासः ससमासस्यतुरात्रिशब्दस्यपुंसि
योगंविजानीयात् यथापूर्वरात्रः अर्धरात्रः वर्षारात्रः ४२ पुरमधुजगंतिविद्यान्नपुंसकेवास्त्रियां
भवेदर्चिः त्वत्तलौनपुंसकस्त्रीविधावहः पुंसिसंख्यादिः ४२ पुरादीनिनपुंसकेविजानीयात् इदंपुरं

नगरं मधु क्षौद्रं जगद्विश्वं अर्चिः शब्दः स्त्रियां भवति वा इयमर्चिः इदमर्चिः दीप्तिः त्वतलोः प्रत्ययो यथा
५० संख्यं नपुंसकस्त्रीविधो द्रष्टव्यो ब्राह्मणस्य भावो ब्राह्मणत्वं ब्राह्मणता एवमिदं शूद्रत्वं इयं शूद्रता अ
१३ हः शब्दः सदा संख्यादिः सदा पुल्लिङ्गो भवति अयमेकाहः द्व्यहः त्र्यहः संख्यादेरिति किं पुण्याहं स्व
स्त्यहं ५३ रुत्वंतात्पुंसि करोरुदारुजतुवस्तुमस्तुभिस्त्यक्ताः स्रुः सांगं थिवस्याः इरुसर्वा नंता
13 नां नपुंसकता ५४ रुशब्दांतास्तुशब्दांतास्तु कशेरुदारुजतुवस्तुमस्तुभिस्त्यक्ताः रहिताः समंथि
न्नस्याः पुंसि भवेयुरित्यर्थः यथायं तरुः खड्गमुष्टिः मरुर्भर्ता मरुर्निर्जलदेशः चरुर्मंत्रत्तन्न
पाकः शत्रुः रिपुः तरुर्वृक्षः मरुर्मृगः मेरुः पर्वत इत्यादि अयं केतुरुत्पातः सेतुर्बंधः हेतुः का
रणं जंतुः परप्रकृतिः धातुः श्लेष्मादिः कशेरुप्रभृतयो नपुंसके भवंति इदं कशेरु भूसंभवं इदं दा

स्काशं जतुलाक्षा वस्तुवाकास्त्रबंधहेतुः मस्तुदधिसंभवं मंथिप्रस्थोच पुंसिभवतः अयंमंथिः मं
थिरितिप्रसिद्धः प्रस्थः परिमाणं इमंतानामुक्तानां चन पुंसकतास्यात् इदंसर्पिः घृतं हविर्देवान्नं वर्हिः
पवित्रमित्यादि इदंवपुः शरीरं आयुः जीवितपरिमाणं धनुः शास्त्रमित्यादि धनुर्ग्रहणेन वर्णादिदादिभ्यः
ष्यञितिग्रहणे नबालक्षणादिभ्यः सौकुमार्यं कार्त्स्न्यं दाक्ष्यमित्यादि ४४ पुंसिस्त्रियांचपाटलिगोमुष्टि
शनिवाहुसिंधुमणयः आशीर्धूः पूः क्षुत्तृट्गिरः स्त्रियामुदुषोच ४५ एतेशब्दाः पुंसिस्त्रियांभवंति अयं
पाटलिः इयंपाटलिर्वृक्षविशेषः अयंगौः इयंगौः अयंमुष्टिरियंमुष्टिः अयमशनिरियमशनिः अ
यंवाहुरियंवाहुः अयंसिंधुरियंसिंधुः अयंमणिरियंमणिः एतेशब्दाः स्त्रियांभवंति इयमाशीः इष्टा
शंसा इयंधूः भारः कीलश्च इयंपूः पुरी इयंक्षुद्बुभुक्षा इयंतृट्पिपासा इयंगीर्वाणी इयमुत्तहर्षः इ

ने·
१५
15

यंतट्रोषः ८५ शीकरस्तुषारस्तुसबुद्बुदफेनोसस्तंडुलयूपाः पुंसिस्युः आलिमुक्ताजिदर्विसिकताः स्त्रि
यामुदिताः ८६ एतेशब्दाः पुंसिस्युर्भवेयुरित्यर्थः शीकरोंवुकणः तुषारोहिमसंततिः तुषोधान्यबुषः
कडंगरश्च बुद्बुदोजलंकारः फेनोजलस्य समुद्रस्य श्वासोवपर्यायः तंडुलोधान्यविशेषः अपूपःपिष्टकस्य
एतेशब्दास्त्रियामुदिताःकथिताः इयमालिःपंक्तिः मुक्तारत्नं आजिर्युद्धं दर्विभक्तिसाधनं सिकता वालु
का अजिनाजिरशैवालनम्रणालतुहिनोडुयाज्यसस्यानि द्वारास्पदकाष्टानिचनपुंसकान्येवपटलंच
८७ एतेशब्दान्पुंसकेभवंति इदमजिनमृगत्वक् इदमजिरमंगणं शैवालंजलसंभवं नलंसुवर्ण
भाजनं म्रणालंपद्ममूलं तुहिनंतुषारः उडुपंज्ञवः आज्यंघृतं सस्यंव्रीहिः द्वारंगृहस्य आस्पदंराज्ञां
काष्टमिंधनं पटलंगृहस्य तिमिरंवा एवकारोऽवधारणे ८७ त्रिष्वप्यक्षोविंद्रियसंज्ञकाएतान्नपुंसके

विद्धि शेषाः पुंसि प्रोक्ताः श्रीपिष्टाद्याश्च निर्यासाः ४८ त्रिष्वप्यक्षे पुमध्येइंद्रियसंज्ञकमक्षं नपुंसके विद्धि
इदमक्षमिंद्रियं शेषास्त्वक्षाः पुंसि प्रोक्ताः अयं देवानामक्षः कटाक्षः श्रीपिष्टाद्या निर्यासाश्च पुंसि भवंति
अयं श्रीपिष्टः सर्जरसः गुग्गुलइत्येवमादयः ४८ विंशतित्रिंशनवत्तेः स्त्रीनपुंसके तालुहृदयकुक्षानि पा
र्श्वककुंदरविन्यत्तलधनलवणराष्ट्राणि चावेहि ४९ विंशत्यिभ्यत्तयो नवतिपर्यंताः स्त्रियांभवंति इ
यं विंशतिः त्रिंशत् चत्वारिंशत् पंचाशत् षष्टिः सप्ततिः अशीतिः नवतिः एतानि नपुंसके भवंति इदं
तालुवदनैकदेशः हृदयं जीवनस्थानं कुक्षिर्भित्तिः एतानि नपुंसकान्यवेहि अवगच्छेत्यर्थः इदं पार्श्व
शरीरस्य ककुंदरं नितंबकूपद्वयं विशायंद्रव्यं तलमधः धनं द्रविणं लवणं रसविशेषः राष्ट्रं जनपदस्था
नं ४९ क्रोडाघाटाजिह्वाशिरोधराशष्कुलीस्पृहामाया स्त्रियां विद्धि शाखाशिफाकलाभेखलारेखा

जिपंक्तीच ५० एताः स्त्रियांविद्धि इयंक्रोडा अंकः घाटा ग्रीवा शिरोधरा ग्रीवा जिह्वा रसना शष्कुली खं

रे० डस्य भक्ष्यद्रव्यं स्पृहा वांछा माया जनवंचनेच्छा इयं शाखा वृक्षस्य शिखा चूडा फला विस्तानं मेखला

१५ कांची रेखा राजि र्घनस्य पंक्ति र्दन्तानां ५० स्नायुश्चाद्धोल्काश्च स्त्रियां खड्गा भवेत्त्रेता ताराणा वाणा धाराणा वि

म्बाणा संकुणा विकोणा च ५१ एते शब्दाः स्त्रियां भवंति स्नायुः शरीरस्य अश्रद्धा श्रादः उल्का आकाशा

15 त्यातः ज्वाला च खड्गा शयनीयं त्रेतायुगं ताराणा स्त्वरचना वाराणा वाराणि धाराणा अस्त्रा विम्बाणा लीला

संकुणा नासिका विकोणा नेत्रविस्फुर्धिः ५१ भयबीजसिध्मपदवर्हमुक्तातक्रसुखदुःखशिखराणां

विद्यान्नपुंसकत्वमष्टगित्यस्य सदैव ५२ एते शब्दाः नपुंसके भवंति इदं भयं त्रासः बीजमंकुरोत्पत्तिका

रणं सिध्मं कुष्टविशेषः पदंस्थानं वर्हं मयूरपिच्छं मुक्तं रेतः तक्रं मथितं सुखं भोगः दुःखं पीडा शिख

रंभृंगं अस्त्करजं सदेवेति वचनाज्ञ्यादीनां व्यभिचारः अयंभयः ५१ पाषाणोपमृगारत्रस्था भृंगा
रमस्तकस्तवकाः रूपंमुक्त्वाशब्दरसस्पर्शगंधाश्चमस्तोत्काः सतपुंसि ५२ एतेशब्दाःपुंसिभवंति यथायं
पाषाणःप्रस्तरःउपलःशिलापाषाणएव भृंगारोविदग्धता अस्थःपरिमाणं भृंगारःसुवर्णमयःक
लसः स्तवकःशिरः स्तवकःपुष्पोत्करः शब्दोध्वनिःरसोमाधुर्यादिः स्पर्शोमृदुकर्कशादिः गंधोनासिका
ग्राह्यः कुसुमादेः रूपंमुक्त्वा रूपंविहाय रूपंनपुंसकेभवति इदंरूपंचक्षुर्ग्राह्यं ५३ रोरवायूपपुरोडाशकू
पसूपलवणाब्धाः धर्मभयवासोदशादाराः पुंसिबहुत्वंचैषां ५४ एते शब्दाःपुंसिभवंति अयंशोरव
ःपुष्पसंघातः उत्तुंगोवा यूपोयज्ञभांडं पुरोडाशोयज्ञपिंडकः कूपोऽवटः सूपोव्यंजनं लवोलेशः शा
घ्रावालनम्रणं धर्मउपवासादिः भयोवेश्म वासांसिवस्त्राणि तेषांदशाः दाराःस्त्रियश्चपुंसिभवंति व

व० २६

16

हुत्वं चैषां सदा भवति इमे वासो दशाः वस्त्रांतसूत्रं इमे दाराः स्त्रियः वासइति किं दशाऽवस्था ५७
मांसाभिधरामिधानं नपुंसके विद्धि तीर्थं तुंडे च यवमाषाद्यास्तु व्रीहयः पुंसि प्रियंगवस्तु स्त्रियामेव ५५
मांसाभिधानं खिनपुंसके विद्धि तीर्थं तुंडे च यवमाषाद्या व्रीहयः पुंसि प्रियंगवस्तु स्त्रियामेव ५५ मांसा
भिधानं विवराभिधानं च तीर्थं तुंडे च नपुंसके विद्धि जानीहि यथा मांसं पललं क्रव्यमित्यादि इदं वि
वरं बिलं छिद्रं रंध्रं कुहरं सुषिरमित्यादि इदं तीर्थं पुण्यस्थानं तुंडं वक्त्रं यवमाषाद्या व्रीहयः पुंसि
यथा इमे माषाः मुद्गाः कुलत्थाः मोद्गाः गोधूमाः तिलाः कलायाः मसूराः सर्षपाः प्रियंगवस्तु
स्त्रियामेव इमाः प्रियंगवः ५५ पत्रे वडन्तः पुंसि तु नपुंसके किसलयं स्त्रियां लाक्षा रुग्गोचना पिं
डकार्कं इः स्नपा चैव ५६ पल्लवाद्यः पुंसि भवंति यथा पल्लवः इदं किसलयं प्रवालं लाक्षा स्त्रियां

स्यात्त इयंलाक्षाजतुः ऋगादयःशब्दाःस्त्रियांभवंति इयमेकावेदावयवः रोचनागोपित्तं पिंडिकारा
रायर्गं कंडूः खर्जूः सपारास्त्रि: ५६ कललकफयूषकुल्माषकल्ककल्यगेहमखलोहित्याः गर्गरपुंख
चषालाश्चपुंसिकटाहमत्स्योच ५७ एतेशब्दाःपुंसिभवंति अयंकललोगर्भाशयः कफःश्लेष्मा यू
षःशाकाद्यन्नविकारः कुल्माषःसस्यजातिः कल्कःसर्षपादीनांचूर्णं कल्यःकालपरिमाणं गेहोगृ
हं मखोयज्ञः लोहित्योनदविशेषः गर्गरोवादित्रविशेषः पुंखःशरस्य चषालोयूपाग्रं कटाहो
लोहभाजनं मत्स्योमीनः ५८ शवपलकतल्पसद्मवलिशामिषनिमित्तपित्तचित्तानि किल्बि
षवृजिनानि तथानपुंसकेपीठपायेच ५९ एतेशब्दाःनपुंसकेभवंति यथाइदंशवं मृतशरीरं फल
कं नेत्ररोमविशेषः तल्पं शयनीयं सद्मनिवासः वलिशंमत्स्यबंधनं आमिषंगृहद्वारं निमित्तंकार

१०
१२
17

णं पित्तंधातुविकारः चित्तंमनः किल्बिषंपापं वृजिनंकुटिलंपीठमासनंपापंपातकं ५८ वल्वजला
जासूनांपुंयोगःस्याद्बहुत्वंच स्थलशाड्वलशिबिराणांनपुंसकत्वंस्त्रियांपृतना ५८ वल्वजादयः
शब्दाःपुंसिभवंति बहुत्वंचैषांसदैव इमेवल्वजाः शष्पाः इमे[illegible]लाजाः भृष्टधान्यानि असवःप्राणाएते
शब्दाःनपुंसकेभवंति इदंस्थलमप्रायप्रदेशः शाड्वलंहरिततृणं शिबिरंशकटस्थानं पृतनाशब्दःस्त्रियां
भवति इयंपृतनासेना ५९ ईर्ष्यारुचिःस्फुलिंगाःशय्यानिःश्रेणिःकोटिःकटीवाणी पेशीवरूथिनी
चक्लिसींकुथानाडिकाकंथा ६० एतेशब्दाःस्त्रियांभवंति इयमीर्ष्यासूया रुचिर्दीप्तिः अभिलाषो
वा स्फुलिंगाःअग्निकणाः शय्याशयनीयं निःश्रेणीअधिरोहणी कोटिःसंख्या कुटीगृहंवा
णीवाक् पेशीमत्स्यंडी वरूथिनीसेना कुथाउर्णाकृता नाडिकाकालपरिमाणं कंथाजीर्णवासःप्रा

वरणं ६ नाडुपपदं व्रणं पुंसि वृक्षजनपांसुकंदुककलशाश्च पंजरपलितद्वंद्वाक्षराणि विद्यादितरजातौ ६१
नाडीपूर्वं व्रणं पुंसि भवति अयं नाडीव्रणः नाडुपपद इति किं दुष्टव्रणं वृक्षादयः पुंसि भवंति अयं वृक्षस्त
कः जलौलोकः पांसुश्चूर्णं कंदुःस्वेदनी कादीरकपालस्थानं कलशो घटः पंजरादीनि इतरजातौ न पुंसके
जानीयात् इदं पंजरं शकुनिबंधनं पलितं जरा द्वंद्वं वैरं अक्षरं वैरः ६१ मेधारसनानिद्रातंद्रातंत्र्यः स्त्रि
यां समंजिष्ठाः मदिरामंदुराकृशरास्यात्तां वा सह दुंदुभिश्च ६२ एतोस्त्रियां भवंति इयं मेधा धारणाशक्तिः
रसना शक्तिर्मेखला च निद्रा सुप्तिः तंद्रा आलस्यं तंत्री वाद्यविशेषः मंजिष्ठा रागद्रव्यं स्यात्तां भवेतामि
त्यर्थः इयं मदिरा सुरा मंदुरा वाजिशाला कृशरा तिलयवागूः अक्षैर्दीव्यते अक्षाग्रहणं वादित्रसंबंधनि
रस्यार्थं वाद्यं दुंदुभिरस्यार्थः ६२ धान्यद्विदलांशुकविमानवलयरत्नमिथुनस्मशानानि विसत्तिमि

१०
१८
18

रारापपिविद्यान्नपुंसकेनगरेचैव ६२ एते शब्दाः नपुंसके भवन्ति इदं धान्यं सस्यं द्विदलं मुद्गादीनां शृंगमुकं वस्त्रं
वितानं वस्त्रमयमावरणं वल्लयेत्तु वल्लीहीनो वल्लं मार्गः मिथुनं स्त्रीपुंसद्वंद्वं श्मशानं मृतस्थानं विसंप
द्मूलं तिमिरं तमः शृंगं शिखरं श्रेष्ठं वा रत्नमाकाशं ६३ पुंजादिर्लोलककोशवककषायतरलपिण्याकगर्भदर्भाश्च
पुंसि स्युः पत्तनमुल्वतामचापनाम्नां नपुंसकता ६४ एते शब्दाः पुंसि स्युः अयं पुंजः संघातः अद्रिः पर्वतः को
लोगदहादीनां करीषो गोमयविकारः गर्भश्चोदर्यः दर्भः कुशः अर्भो बालः पत्तनादीनां ये पर्यायाः शब्दास्ते
षां नपुंसकता इदं पत्तनं नगरं पुरमित्यादि शुल्वं म्लेच्छमुखं ताम्रमुदुंबरमित्यादि चापं धनुः कार्मुकमित्यादि
६४ विड्वर्णौ स्त्री विशेष्या सारस्नावाच्यो चनीविभेर्यौ च मंजूषा मंडूषा मूषा पारिवज्जुहा चैव ६५ विड्शब्दो य
दा च वर्णस्तदा स्त्रियां भवति यथा इयं विड् विष्ठा अवर्णः शीर्षिकं अयं विड् वैश्यस्तृतीयो वर्णः सास्नादयः

१८

स्त्रियां भवंति सास्नागलकंबलः वीथी गृहावयवः नीवीमूलबंधनं भेरीवाद्यविशेषः मंजूषा पेटा
पुस्तकादीनां गंडूषा हस्तजलं मूषा सुवर्णधमनिका परिषत्सभा गुहा पर्वतस्य ६५ तृष्णा कृपा पता
का रथ्या कृषिश्च काकिणी चैव एते स्त्रियां भवंति प्रतिशीरा धारा च नेमिश्च ६६ एते तृष्णादयः स्त्रि
यां भवंति इयं तृष्णा पिपासा कृपा दया पताका चिह्नं रथ्या मार्गः कृषि वैश्यवृत्तिः काकिणी पणचतुर्भा
गः प्रतिशीरा तिरस्करिणी धारा प्रपतनं तुर्णामियो पर्वतस्य रेखा च नेमिश्चक्रपिंडिका ६६ चतुःपथयु
गलछलचेलखोलधिष्ण्यार्गलशफानां विद्धि नपुंसकभावं परायस्यश्चापि छपलयोश्च ६७ चतुष्पथा
दीनां नपुंसकत्वं विद्धि जानीहि इदं चतुष्पथं युगलं युग्मं छलं व्याजः चेलं वस्त्रजातिः खोलं भग्नभां
डं धिष्ण्यं गृहं अर्गलं द्वारपिधानं शफं खुरः पण्यं विक्रेतव्यं पिच्छं मयूरस्य पलं चतुःपलपरिमाणं ६८

३०
१९
19

रयमं उपनरककपालगुडमणिमेद्रदर्दुरकुसूलाः युग्माकाशव्रतमृंगवर्जिताः मंचः सदापुंसि ६६ एतेश
ब्दाः पुंसि भवंति अयं रयो वेगः मंदुयोजना अयुः नरको दुर्गतिः अवीचिरित्यादि अस्युस्यकपालः शिरोऽव
यवः भिक्षाभाजनंच गुडइक्षुविकारः मणिरत्नं मेढ्रः शिश्नं दर्दुरोभेकः कुसूलो धान्यादिस्थित्याधा
रः युग्माकाशव्रतमृंगवर्जिताइति युग्मादयश्चनपुंसके भवंति इदं युग्मं युगलं आकाशंनभः व्रतंनि
यमः शृंगं विषाणं पर्वतस्यच मंचः काष्टकृतः ६६ स्थूलालक्तककार्पाससूर्यकूर्पाससारथितरंगा अ
लकसमुद्गवराटकनूपुरकंकणाः पुंसि ६६ एतेशब्दाः पुंसि भवंति अयं स्थूलो राशिः अलक्तकः पाद
दिरागद्रव्यं कर्पासः सूत्रद्रव्यं सूर्योरविः कूर्पासः कंचुकं सारथिः सूतः तरंगः कल्लोलः अलकः केश
रचना समुद्गः संपुटः वराटः कपर्दकं ६६ सैन्यायुधमंगलनगरवृक्षफलमूलहरितालविंबमुकुटकु

अलस्तृतीयाप्रकृतिः पुंस्यवसथस्तथोञ्जियः संवीथः कालगीयश्च ७० सेन्यादीनितृतीयाप्रकृतौ
जानीहि इदं सैन्यं वलं आयुधमस्त्रं मंगलंच्च शास्त्रं नगरंपुरं वृन्तं प्रसववंधनं फलंमूलं हरितालंप्रसिद्धं
विंबंप्रतिरूपं मुकुटोशिरोभूषणं कुम्भलंकलिका अवसथोञ्जियोपुंसिभवतः अयमवसथः परिव्राज-
कः अयमुञ्जियः साम संवीथो घटिकात्रयं कालगीयोपितदेव ७० दर्पणाम्रदंगाजठराः पुंस्युक्ताः कुंत
कुणपधूमाश्च व्रातह्रददंडांकुशकटाक्षसंग्रामविटपाश्च ७१ एतेशब्दाः पुंस्युक्ताः अयंदर्पणः आदर्शः
मृदंगोमुरजः जठरः कुक्षिः कुंतः प्रासः कुणपः शवः कालविशेषश्च धूमोवह्निसंभवः एतेपुंसिभवं
ति अयंव्रातः संघः ह्रदः सरः दंडआत्तालकुटश्च अंकुशः सृणिः कटाक्षः अपांगदृष्टिः संग्रामोयु
द्धं विटपोलतागुल्मः ७१ याम्यास्त्रियांनिगदितापुंसिवेमाकुणाकूर्चौच कंदस्तूपप्रोथाश्चवंशरस्तु-

१०
२०
20

ध्वजाश्चैव ७१ पापाशा दः स्त्रियां कथितः इयं पामा विचर्चिका कच्छः वेमादयः पुंसि भवंति ७१
यं । वेमा तंतुवायस्य कुणपो मृत्तशरीरं कूर्चः श्मश्रु अयं कंदरः पर्वतस्यैकदेशः यूपः संघातः घोणो
ऽश्वस्य नासिकादिवरयोरुपरिदेशः वंशो वेणुः रेणुः पांसुः ध्वजः केतुः ७२ केदारखंडप्रशामाश्च पुंसि
निर्त्यकपाटाश्च हेला कांची लाला सुधा युधाः स्नुः स्त्रियां प्रवेणी च ७३ एते पुंसि भवंति अयं केदा
रः क्षेत्रं खंडः इक्षुविकारः प्रशामो धान्यच्छेदनः कपाटो द्वाः पिधानं एते स्त्रियां भवंति इयं हेला अनाद
रः कांची मेखला लाला श्लेष्मविकारः सुधाऽमृतं सुधा युद्धं प्रवेणी केशरचना ७३ हानिग्ला
निर्वापी विपणी सार्थश्चैवेतया स्वाहा लक्ष्मी मनः शिला पानहः स्त्रियां स्यारावन्याज्वराः पुंसि ७४
एते स्त्रियां भवंति हानिरपचयः ग्लानिरशक्तिः वापी पुष्करिणी विपणी पण्यवीथिका सारीपटोलि

का स्वाहा मंत्रावसानं लक्ष्म्यादयः स्त्रियां भवंति इयं लक्ष्मीः श्रीः मनःशिला धातुद्रव्यं इयमुपान
त् उपलब्धी स्यात् अण्वादयः पुंसि भवंति अयं स्थाणुः शिवः कीलश्च अणुः सूक्ष्मः ज्वरो रोगः ७४ पुंसि स्यात्प्रा
ग्वंशस्त्रिषु लिंगेषु खलं विद्धि चमसस्तंभनिदाघः पांशुमूकविटकाश्च पुंस्युक्ताः ७५ प्राग्वंशशब्दः पुं
सि भवति अयं प्राग्वंशो यज्ञकुटी खलं त्रिषु लिंगेषु जानीहि अयं खलः इयं खला इदं
खलं एते पुंसि कथिताः अयं चमसः सोमपात्रं अयं स्तंभः निदाघो घर्मः पांशुर्गर्वादिः मूको धान्या
दीनां विटकः पिंडकृतपारिमाणद्रव्यं शौंडो वा ७५ वल्कलकुंडलहिमचिह्नखलीनककुदगुह्यमुस्त
शकस्तानि तीरोलूखलकवचानि च विद्यादितरजानि ७६ वल्कलादीनि नपुंसके जानीयात् इदं
वल्कलं त्वक् कुंडलं कर्णभूषणं हिमं तुहिनं चिह्नमंकः खलीनं कंडिका ककुद्वृषस्य गुह्यं गो

व०
२१

प्यस्थानं शुल्कं शून्यस्थानं शाकलं खंडः नीरं नदीकूलं उत्खूखलं धान्यादिक्षोदनं कवचं सन्नाह १६
मंडलकेशरभांडोत्तरीयसोपानकल्मषाद्यानि चादितं नपुंसके सह कुटुंबपुलिनाभ्यां ११ एते नपुंसके भवं
ति इदं मंडलं सूर्यस्य केसरं किंजल्कः भांडमुपकरणद्रव्यं उत्तरीयं प्रावरणं सोपानं खंडखंडिका कल्मषं पा
पं अर्घं पाद्यं च चशब्दादेतत् अंशं तं नपुंसकौ विद्धि लिनौ ॥ इदं पात्तमत्त एवानुपसर्गस्तु पुंस्येवांतरा
द्धः कुटुंबपुलिनशब्दाभ्यां सह नपुंसके इदं कुटुंबं गोत्रवर्गः इदं पुलिनं द्वीपं ११ स्थालीसभाजाणां स्त्री
त्वं स्थल्यास्त्रवीच्यास्त्र छविकद्योर्मंजर्याविल्वाश्चैवं विजानीयात् १९ स्थाल्यादीनां स्त्रीत्वं भवति
इयं स्थाली रंधनभांडं सभा गोष्ठी जरा वृद्धत्वं स्थली अकृत्रिमनिर्जलो देशः वीची तरंगः छविर्लविराय
कोटिः श्रोणी मंजरी वृक्षस्य वल्ली लता १९ शिलं छर्दिस्त्वन्नं शामलमरकतं पलालकुष्माणि मं

ह्लिरिक्थंचनपुंसके मंदुरं तु स्त्रियां विद्धि ७९ एतेनपुंसके भवति इदं शिल्पं कलादिकं कर्म छर्दि
वींतिः अन्नं भक्ष्यं शमलममेध्यं मरकातं रत्नं पलालं धान्यादीनां कृष्ठे काष्ठं मंदिरं गृहं रिक्थं द्र
व्यं मंदुराशब्दं स्त्रियां जानीयात् इयं मंदुरा वाजिशाला ८० कल्ककृमिमुन्यंगारवप्रग्रहहोमर्षि
यक्ष्मरेफाः मंडकारंडवरंडाश्च पुंसि स्युः सपर्यावरांशोच ८१ एते पुंसि भवंति अयं कल्कः पापं दंभश्च
कृमिः कीटः मुनिस्तपस्वी अंगारः काष्ठस्य वप्रः प्राकारः ग्रहउपरागः होमो मंत्राहुतिः ऋषिस्ता
पसः यक्ष्मा रोगः रेफो वर्णविशेषः अधमश्च मंडोन्नविकारः कारंडः कुशभांडः वरंडः काष्ठवि॰
शेषः सपर्या प्रत्ययकरणं अंशविशेषो भागः ८१ मथुरा तनुस्तनूर्वर्त्तिनीस्सूचियवागूर्वर्त्तिनि॰
काप्राशर्कराः स्त्रियां पुंसि तर्कश्च ८२ एते स्त्रियां भवंति इयं मथुरा नगरी तनुः शरीरं तनुस्त॰

बु०
२२
22

देव वर्त्तिनी काष्ठोद्भवं शाखसाधनं सूची मूलं पा वस्य यवागूः अन्नविकारः वारीः सारीः निकाशा
कर्षविकारः शर्करा गुडविकारः तर्कः पुंसि भवति अयं तर्कद्रुहः चशब्दः पादपूरणे ९२ वंधुरविषा
णयोस्त्रिकं भवेत्पेच्चलं तृतीयं स्यात् शकटोशीरकुतूहलशरावकुंदानि जानीहि ९३ त्रिकमिति
त्रिंगवित्तयं अयं वंधुरः इयं वंधुरा इयं वंधुरं उत्तमांसं अयं विषाणः इयं विषाणा इदं विषाणं श्रृंगं
पल्वलं तृतीयं नपुंसकमित्यर्थः इदं पल्वलं अल्पसरः एतानि नपुंसकानि जानीहि इदं शकटं
यानं इदमुशीरं वीरणमूलं कुतूहलं कुतुकं शरावं मृण्मयभाजनं कुंदं समूहः ९३ यूकोल्का सु
क्तोषधिवर्त्तिभ्रुकुट्यः स्त्रियामुदिताः वाल्मीकाध्वरनिर्यूहव्यूहमुसलकाः पुंसि कुंभश्च ९७ एतोस्त्रि
यामुदिताः इयं यूका मस्तककृमिः उल्कासंघात इयं दग्धकाष्ठं च सुक्तिर्जलसंभवं अयोषधिः फ

२२

लपाकांतोवृक्षविशेषः वर्तिर्दीपस्य भ्रुकुटिर्भ्रूभंगः पुष्परचना वाल्मीकादयः पुंसि भवंति य
थावाल्मीकिः ऋषिः मत्कूणस्य अध्वरो यागः निर्यूहस्त्वंद्रपाणिः व्यूहः समूहः प्रभूतः पुलको
गंधद्रव्यं च कुंभो घटः ९४ केयूरतरलतूर्यांगदानि नित्यं नपुंसके वाच पुंसि गवाक्षं विद्यात्स्त्रियां
श्यामा भुसुंडि भांडी च ९५ केयूरादीनि नपुंसके जानीहि इदं केयूरं बाहुभूषणं इदं तरलमलंकारः
तूर्यं वादित्रं अंगदं बाहुभूषणं गवाक्षशब्दं पुंसि विद्याज्जानीयादित्यर्थः यथा अयं गवाक्षो वाता
यनः एते शब्दाः स्त्रियां भवंति इयं यथा माश्वी भुसुंडी आयुधं भांडी भिंडिपालः ९५ भवतोऽ
पजनोपपदत्वंगपदौ पुंसि नित्यमनिश्च रक्षणकोष्ठ्येणाश्च सहनिपातोपसर्गाभ्यां ९६ अयो
पपदे अंगशब्दः जनोपपदे पदशब्दश्च पुंसि भवतः यथा अयमपांगो नेत्रांतः अयं जनपदो लो

१०
२२
23

कः पृथ्व्यादिभ्य इमनिच् अन इत्यनुवर्त्तते टेरिति टिलोपः स्वरितो हलादिर्ल्लघोरिति रेफादेशः इम
निच्प्रत्ययान्ताः पुंसि भवन्ति अयं प्रथिमा गरिमा लघिमा द्रढिमा इत्येवमादयः एते पुंसि भवन्ति
अयं रक्षणात्तस्थानं अयं कोष्ठो हरिशाला अयं भेषोऽन्यायः निपातश्चादिः उपसर्गः प्रादिः ९६
स्थावराणामयथ घुट्यकवुञ्नस्तु यदि वा भावे कर्मणि स्युस्तदेषां नियतानपुंसकता ९७ अण् अञ्
यत् तल् वुञ् यक् वुञ् च एते प्रत्ययाः भावे कर्मणि चापादस्युस्तदा तदन्तानामेतेषां नपुंसकत्वं जानी
हि यथा हायनान्तयुवादिभ्योऽण् द्विहायनस्य कर्म भावो द्वैहायनं यूनो भावः कर्म वा यौव
नं न एकत इति नलोपे प्राप्ते इत्यणि वा न इति प्रकृतिभावः स्थाविरं याजमानं इगन्तात्त्व लघुपूर्वा
दित्यणि मृदो भावः कर्म वा मार्दवं पाटवं लाघवं आर्जवं अञ् ब्राह्मणजातिभिर्ज्जातिवयोवचनो

गोत्रादिभ्योऽञ् अश्वस्य कर्म भावो वा आश्वं गार्दभं वयोवचनात् कौमारं शैशवं उद्गात्रादेःञ्
ञौद्गात्रं सख्युर्यः इति यः सख्युर्भावः कर्म वा सख्यं स्तेयन्नलोपश्चेति यात्प्रत्ययः स्तेनस्य कर्म भा
वो वा स्तैन्यं होत्रादिभ्यो यः होतुर्भावः कर्म वा होत्रीयं पोत्रीयं अगात्रीयं दुहित्रीयं ठक् कपेर्भावः
कर्म वा कापेयं रोहितादिभ्यो यक् बृहस्पतेर्भावः कर्म वा बार्हस्पत्यं सैनापत्यं पुत्रयोपधाद्गुरूपोत्तमा
द्वुञ् रमणीयस्य भावः कर्म वा रामणीयकं आहोस्वामि त्यादिकं द्रष्टव्यं ९१ व्रजमूलौ पुंसि नपुंसके
च मूर्धं केवल तोमर मुकुल कंदुकाः पुंसि भाषायां ९२ व्रजमूल शब्दौ पुंसि भवतः अयं व्रजः
अयं मूलः मूर्धं नपुंसके विद्धि इदं मूर्धं युद्धं एते शब्दाः पुंसि भवंति अयं केवलः तृणविशेषः अयं
तोमरः शरप्रहरणं मुकुलः कुड्मलः कंदुको यानं। भाषा शब्दः स्त्रियां भवति इयं भाषा क

व०
२५

25

मलपत्री ८८ अकारेकारांतंस्थावरंजंगमं स्त्रियां भवेन्नित्यं क्वचिदूकारांतमपिप्रोक्तं वापुंसियोनिः
स्यात् ८९ अकारांतमीकारांतं यत्स्थावरंजंगमं तत्सर्वंस्त्रीलिंगं भवति आकारांतंस्थावरं यथा उ
यं गंगायमुना नर्मदा ईकारांतं शरावतीसरस्वतीत्यादि आकारांतंजंगमं यथा इयं देवदत्ता यज्ञद-
त्ता वलाका अंबिकेत्यादि ईकारांतं कुमारी गौरी ब्राह्मणी हस्तिनी श्वश्रूः वधूः क्वचिदिति
किं कटप्रूः धान्यलूः अयं योनिः इयं योनिः ९० वाग्विषयस्य च महतः संक्षेपतः स्फुटविधि
रुक्तः यन्नोक्तमत्रसद्भिस्तल्लोकतएवबोद्धव्यः ९१ इतिश्रीमदखिलवाग्विलासमंडि
तसरस्वतीकंठाभरणानेकविशारदश्रीनरपतिसेवितविक्रमादित्यकिरीटकोटिनिघृष्टच
रणारविंदाचार्यवररुचिविरचितोलिंगविशेषविधिः समाप्तः ॥